**GEETA CHAPTER 5 Verses 1-14**

**श्रीमद् भगवद् गीता** **śrīmad bhagavad gītā**

**अथ पञ्चमोऽध्यायः।** **atha pañcamo'dhyāyaḥ |**

| | |
|---|---|
| ॐ हरिः ॐ | Om ha-riḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | ha-riḥ om |
| ॐ श्री कृष्ण परमात्मने नमः | om śrī kṛṣ-ṇa -pa-ram-āt-ma-ne na-maḥ |
| श्रीमद् भगवद् गीता | śrī-mad bha-ga-vad gī-tā |
| अथ पञ्चमोऽध्यायः। | atha pañ-ca-mo'-dhyā-yaḥ \| |
| संन्यासयोगः | saṁ-nyā-sa-yo-gaḥ |

| | |
|---|---|
| अर्जुन उवाच। | ar-ju-na uvā-ca \| |
| संन्यासं कर्मणां कृष्ण | saṁ-nyā-saṁ kar-ma-ṇāṁ kṛṣ-ṇa |
| पुनर्योगं च शंससि। | pu-nar-yo-gaṁ ca śaṁ-sasi \| |
| यच्छ्रेय एतयोरेकं | yac-chre-ya eta-yo-re-kaṁ |
| तन्मे ब्रूहि सुनिश्चितम्॥ ५-१॥ | tan-me brū-hi su-niś-ci-tam \|\| 5-1\|\| |
| | |
| श्रीभगवानुवाच। | śrī-bha-ga-vān-uvā-ca \| |
| संन्यासः कर्मयोगश्च | saṁ-nyā-saḥ kar-ma-yo-gaś-ca |
| निःश्रेयसकरावुभौ। | niḥ-śre-ya-sa-ka-rā-vu-bhau \| |
| तयोस्तु कर्मसंन्यासात् | ta-yos-tu kar-ma-saṁ-nyā-sāt |
| कर्मयोगो विशिष्यते॥ ५-२॥ | kar-ma-yo-go vi-śiṣ-ya-te \|\| 5-2\|\| |

| | |
|---|---|
| ज्ञेयः स नित्यसंन्यासी | jñe-yaḥ sa nit-ya-saṁ-nyā-sī |
| यो न द्वेष्टि न काङ्क्षति। | yo na dveṣ-ṭi na kāṅk-ṣa-ti \| |
| निर्द्वन्द्वो हि महाबाहो | nir-dvan-dvo hi ma-hā-bā-ho |
| सुखं बन्धात्प्रमुच्यते॥ ५-३॥ | su-khaṁ ban-dhāt-pra-muc-ya-te \|\| 5-3\|\| |
| | |
| सांख्ययोगौ पृथग्बालाः | sāṁkh-ya-yo-gau pṛ-thag-bā-lāḥ |
| प्रवदन्ति न पण्डिताः। | pra-va-dan-ti na paṇ-ḍi-tāḥ \| |
| एकमप्यास्थितः सम्यक् | ekam-ap-yā-sthi-taḥ sam-yak |
| उभयोर्विन्दते फलम्॥ ५-४॥ | ubha-yor-vin-da-te pha-lam \|\| 5-4\|\| |
| | |
| यत्सांख्यैः प्राप्यते स्थानं | yat- sāṁkh-yaiḥ prāp-ya-te sthā-naṁ |
| तद्योगैरपि गम्यते। | tad-yo-gai-ra-pi gam-ya-te \| |
| एकं सांख्यं च योगं च | ekaṁ sāṁkh-yaṁ ca yo-gaṁ ca |
| यः पश्यति स पश्यति॥ ५-५॥ | yaḥ paś-ya-ti sa paś-ya-ti \|\| 5-5\|\| |
| | |
| संन्यासस्तु महाबाहो | saṁ-nyā-sas-tu ma-hā-bā-ho |
| दुःखमाप्तुमयोगतः। | duḥ-kham-āp-tum-a-yo-ga-taḥ \| |
| योगयुक्तो मुनिर्ब्रह्म | yo-ga-yuk-to mu-nir-brah-ma |
| नचिरेणाधिगच्छति॥ ५-६॥ | na-ci-re-ṇā-dhi-gac-cha-ti \|\| 5-6\|\| |

**GEETA CHAPTER 5 Verses 1-14**

**श्रीमद् भगवद् गीता** **śrīmad bhagavad gītā**

**अथ पञ्चमोऽध्यायः।** **atha pañcamo'dhyāyaḥ |**

| | |
|---|---|
| योगयुक्तो विशुद्धात्मा | yo-ga-yuk-to vi-śud-dhāt-mā |
| विजितात्मा जितेन्द्रियः। | vi-ji-tāt-mā ji-ten-dri-yaḥ \| |
| सर्वभूतात्मभूतात्मा | sar-va-bhū-tāt-ma-bhū-tāt-mā |
| कुर्वन्नपि न लिप्यते॥ ५-७॥ | kur-van-na-pi na lip-ya-te \|\| 5-7\|\| |
| | |
| नैव किञ्चित्करोमीति | nai-va kiñ-cit-ka-ro-mī-ti |
| युक्तो मन्येत तत्त्ववित्। | yuk-to man-ye-ta tat-tva-vit \| |
| पश्यञ्शृण्वन्स्पृशञ्जिघ्रन् | paś-yañ-śṛṇ-van-spṛ-śañ-jigh-rann |
| अश्नन्गच्छन्स्वपञ्श्वसन्॥ ५-८॥ | aś-nan-gac-chan-sva-pañ-śva-san \|\| 5-8\|\| |
| | |
| प्रलपन्विसृजन्गृह्णन् | pra-la-pan-visṛ-jan-gṛh-ṇann |
| उन्मिषन्निमिषन्नपि। | un-mi-ṣan-ni-mi-ṣan-na-pi \| |
| इन्द्रियाणीन्द्रियार्थेषु | in-dri-yāṇ-īn-dri-yār-the-ṣu |
| वर्तन्त इति धारयन्॥ ५-९॥ | var-tan-ta iti dhā-ra-yan \|\| 5-9\|\| |
| | |
| ब्रह्मण्याधाय कर्माणि | brah-maṇ-yā-dhā-ya kar-mā-ṇi |
| सङ्गं त्यक्त्वा करोति यः। | saṅ-gaṁ tyak-tvā ka-ro-ti yaḥ \| |
| लिप्यते न स पापेन | lip-ya-te na sa pāp-ena |
| पद्मपत्रमिवाम्भसा॥ ५-१०॥ | pad-ma-pat-ra-mi-vām-bha-sā \|\| 5-10\|\| |

## GEETA CHAPTER 5 Verses 1-14

**श्रीमद् भगवद् गीता** **śrīmad bhagavad gītā**

**अथ पञ्चमोऽध्यायः।** **atha pañcamo'dhyāyaḥ |**

| | |
|---|---|
| कायेन मनसा बुद्ध्या | kā-ye-na ma-na-sā bud-dhyā |
| केवलैरिन्द्रियैरपि। | ke-va-lai-rin-dri-yai-ra-pi \| |
| योगिनः कर्म कुर्वन्ति | yo-gin-aḥ kar-ma kur-van-ti |
| सङ्गं त्यक्त्वात्मशुद्धये॥ ५-११॥ | saṅ-gaṁ tyak-tvāt-ma-śud-dha-ye \|\| 5-11\|\| |
| | |
| युक्तः कर्मफलं त्यक्त्वा | yuk-taḥ kar-ma-pha-laṁ tyak-tvā |
| शान्तिमाप्नोति नैष्ठिकीम्। | śān-tim-āp-no-ti naiṣ-ṭhi-kīm \| |
| अयुक्तः कामकारेण | a-yuk-taḥ kā-ma-kā-re-ṇa |
| फले सक्तो निबध्यते॥ ५-१२॥ | pha-le sak-to ni-ba-dhya-te \|\| 5-12\|\| |
| | |
| सर्वकर्माणि मनसा | sar-va-kar-mā-ṇi ma-na-sā |
| संन्यस्यास्ते सुखं वशी। | saṁ-nyas-yās-te sukh-aṁ va-śī \| |
| नवद्वारे पुरे देही | na-va-dv-āre pu-re de-hī |
| नैव कुर्वन्न कारयन्॥ ५-१३॥ | nai-va kur-van-na kā-ra-yan \|\| 5-13\|\| |
| | |
| न कर्तृत्वं न कर्माणि | na kar-tṛ-tv-aṁ na kar-mā-ṇi |
| लोकस्य सृजति प्रभुः। | lo-kas-ya sṛ-ja-ti pra-bhuḥ \| |
| न कर्मफलसंयोगं | na kar-ma-pha-la-saṁ-yo-gaṁ |
| स्वभावस्तु प्रवर्तते॥ ५-१४॥ | sva-bhā-vas-tu pra-var-ta-te \|\| 5-14\|\| |

**GEETA CHAPTER 5 Verses 1-14**

**श्रीमद् भगवद् गीता** **śrīmad bhagavad gītā**

**अथ पञ्चमोऽध्यायः ।** **atha pañcamo'dhyāyaḥ |**

| | |
|---|---|
| ॐ हरिः ॐ | Om ha-riḥ om |
| श्री गुरुभ्यो नमः | śrī gu-ru-bhyo na-maḥ |
| हरिः ॐ | ha-riḥ om |

ॐ श्री कृष्णार्पणमस्तु

Om śrī kṛ-ṣṇār-pa-ṇa-ma-stu